# shrIkRiShNAShTakam

# શ્રીકૃષ્ણાષ્ટકમ્

## Document Information

Text title : kRRiShNAShTakam 8

File name : kRRiShNAShTakam.itx

Category : aShTaka, vishhnu, krishna, vallabhaachaarya, puShTimArgIya

Location : doc_vishhnu

Author : vallabhAchArya

Proofread by : PSA Easwaran psaeaswaran at gmail.com

Description/comments : puShTimArgIya stotraratnAkara

Latest update : May 17, 2017

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 31, 2020

*sanskritdocuments.org*

# શ્રીકૃષ્ણાષ્ટકમ્

શ્રીગોપગોકુલવિવર્ધન નન્દસૂનો
રાધાપતે વ્રજજનાર્તિહરાવતાર ।
મિત્રાત્મજાતટવિહારણ દીનબન્ધો
દામોદરાચ્યુત વિભો મમ દેહિ દાસ્યમ્ ॥ ૧॥

શ્રીરાધિકારમણ માધવ ગોકુલેન્દ્ર-
સૂનો યદૂત્તમ રમાર્ચિતપાદપદ્મ ।
શ્રીશ્રીનિવાસ પુરુષોત્તમ વિશ્વમૂર્ત્તે
ગોવિન્દ યાદવપતે મમ દેહિ દાસ્યમ્ ॥ ૨॥

ગોવર્ધનોદ્ધરણ ગોકુલવલ્લભાદ્ય
વંશોદ્ભટાલય હરેઽખિલલોકનાથ ।
શ્રીવાસુદેવ મધુસૂદન વિશ્વનાથ
વિશ્વેશ ગોકુલપતે મમ દેહિ દાસ્યમ્ ॥ ૩॥

રાસોત્સવપ્રિય બલાનુજ સત્ત્વરાશે
ભક્તાનુકમ્પિતભવાર્તિહરાધિનાથ ।
વિજ્ઞાનધામ ગુણધામ કિશોરમૂર્તે
સર્વેશ મઙ્ગલતનો મમ દેહિ દાસ્યમ્ ॥ ૪॥

સદ્ધર્મપાલ ગરુડાસન યાદવેન્દ્ર
બ્રહ્મણ્યદેવ યદુનન્દન ભક્તિદાન
સઙ્કર્ષણપ્રિય કૃપાલય દેવ વિષ્ણો
સત્યપ્રતિજ્ઞ ભગવન્ મમ દેહિ દાસ્યમ્ ॥ ૫॥

ગોપીજનપ્રિયતમ ક્રિયયૈકલભ્ય
રાધાવરપ્રિય વરેણ્ય શરણ્યનાથા ।
આશ્ચર્યબાલ વરદેશ્વર પૂર્ણકામ
વિદ્વત્તમાશ્રય વિભો મમ દેહિ દાસ્યમ્ ॥ ૬॥

કન્દર્પકોટિમદહારણ તીર્થકીર્ત્તે
વિશ્વૈકવન્ધ કરુણાર્ણવતીર્થપાદ ।
સર્વજ્ઞ સર્વવરદાશ્રયકલ્પવૃક્ષ
નારાયણાખિલગુરો મમ દેહિ દાસ્યમ્ ॥ ૭॥

વૃન્દાવનેશ્વર મુકુન્દ મનોજ્ઞવેષ
વંશીવિભૂષિતકરામ્બુજ પદ્મનેત્ર ।
વિશ્વેશ કેશવ વ્રજોત્સવ ભક્તિવશ્ય
દેવેશ પાણ્ડવપતે મમ દેહિ દાસ્યમ્ ॥ ૮॥

શ્રીકૃષ્ણસ્તવરત્નમષ્ટકમિદં સર્વાર્થદં શૃણ્વતાં
ભક્તાનાં ચ પ્રિયં હરેશ્ચ નિતરાં યો વૈ પઠેત્પાવનમ્ ।
તસ્યાસૌ વ્રજરાજસૂનુરતુલાં ભક્તિં સ્વપાદામ્બુજે
સત્સેવ્યે પ્રદદાતિ ગોકુલપતિઃ શ્રીરાધિકાવલ્લભઃ ॥ ૯॥

॥ ઇતિ શ્રીમદ્વલ્લભાચાર્યવિરચિતં શ્રીકૃષ્ણાષ્ટકં સમ્પૂર્ણમ્ ॥

Proofread by PSA Easwaran psaeaswaran at gmail.com

*shrIkRiShNAShTakam*

pdf was typeset on May 31, 2020

Please send corrections to *sanskrit@cheerful.com*